॥कारकप्रारंभः॥

५००



॥श्रीमल्लाश्रयनमः॥सकलगुरवेनमः॥प्रयोगमिच्छता
ज्ञातुज्ञेयंकारकमादितः॥संज्ञायाःषड्विधंभदास्त्रयोवि
ंशतिधापुनः॥१॥योऽर्थाविहितंशब्दप्रयोगंज्ञातुमिच्छति॥
तेनोदोंकारकंज्ञेयंतच्चकारकसंज्ञया॥२॥षड्विधम्॥कर्त्त॰ ॥१॥
कर्म्म॰करण॰संप्रदान॰अपादानाधिकरणानीति॥तद्भ
दाःपुनस्त्रयोविंशतिधाभवंति॥तच्चपंचविधःकर्त्ताकर्म्मस
प्तविधंभवेत्॥करणंद्विविधंचैवसंप्रदानंत्रिधामतं॥१॥
कर्त्ताकर्म्मचकरणंसंप्रदानंतथैवच॥अपादानाधिकरणमित्याहुःकारकोनिषट्
सप्तमी ५

स्वतंत्रकर्त्ता॰हेतुकर्त्ता॰कर्म्मकर्त्ता॰अभिहितकर्त्ता॰अन
भिहितकर्त्ता॰चेतिपञ्चविधः॥तत्राद्योयथापुण्यंकरोति
श्राद्धः॥मैत्रीभजंतेसंतः॥इतिस्वतंत्रकर्त्ता॥अथहेतु
कर्त्ता॥अथहेतुकर्त्ताहितेलंभयंतीतिविनीतान्धीराः॥
लोकाएवलोकंनियमयंन्ति॥तत्रयोजकोहेतुश्चेतिहेतुक
र्त्ता॥अथकर्म्मकर्त्ता॰स्वयमेवमुच्यंतेकुशलबुधयः॥
क

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्वयमेवदृश्यंतेदुष्टजनदोषाः॥स्वयमेवच्छिद्यंतेप्राकृ
तजंतुहाः॥कर्म्मवत्कर्म्मणातुल्यक्रिय॥इतिकर्म्म
वद्भावः॥अथाभिहितकर्त्ता॥साधवःपरार्थमाप्नादयंति॥
अथानभिहितकर्त्ता॥साधुभिरापाद्यंतेपरार्थाः॥अथ
कर्मसप्तविधम्॥ईप्सितम्॥अनीप्सितम्॥ईप्सितानीप्सि
तम्॥अकथितम्॥कर्तृकर्म्म॥अभिहितंकर्म्म॥अनभि

हितंकर्म्मचेति॥तत्रेप्सितंयथा॥दुर्विज्ञानमपिधर्म्म
ज्ञातुंश्रद्दधात्युदारधीः॥कर्त्तुरीप्सिततमंकर्म्मेतिकर्म
संज्ञा॥अनीप्सितंयथा॥कल्याणमपिधर्म्मंप्रक्षिपंति
पापबुद्धयः॥विषंभक्षयंतिक्षुद्राः॥तथायुक्तंचानीप्सि
तमितिकर्म्मसंज्ञा॥ईप्सितानीप्सितंयथा॥पायसंभ
क्षयन्नुपरिरजःपतितंप्रत्यभ्यवहरतिकुमारः॥अ

अग्रेणगृह्णातीति

यज्ञे आहुतिं ददाति इति यज्ञदत्तः

नाद्दंतत्वाद्रजसोनैवेप्सितानीप्सितत्वं ॥ अथाकथितं ॥
गां दोग्धि पयो गोपालः ॥ यज्ञदत्तं कंबलं याचते ब्राह्म
णः ॥ ईप्सितारं याचते सुवर्णमकिंचनः ॥ व्रजमवरुणद्धि गां गोपालः ॥ उपाध्यायं पृच्छति शास्त्रं शिष्यः ॥ वृ
क्षमवचिनोति फलानि दारकः ॥ शिष्यं ब्रवीति धर्मं
गुरुः ॥ पुत्रमनुशास्ति शास्त्रमुपाध्यायः ॥ अकथितं

॥२॥

वंशतटः

चेति कर्मसंज्ञा ॥ कर्तृकर्म यथा ॥ गच्छति शिष्यो ग्रामं ॥
गमयति शिष्यं ग्रामं गुरुः ॥ तत्र गतिबुद्धीति कर्मसं
ज्ञा ॥ अभिहितं यथा ॥ कैटैः क्रियते देवदत्तेन ॥ अनभि
हितं यथा ॥ कटं करोति देवदत्तः ॥ कर्मप्रविभक्तिकरणं ॥
बाह्यमाभ्यंतरं चेति ॥ शरीरावयवादन्यद्बाह्यं यथा ॥ परशुना वृक्षं छिन
द्मि ॥ दात्रेण लुनाति व्रीन्नरः ॥ परशुना

शास्त्रेण

हि

तिदेवदत्तः॥ अथाभ्यन्तरं॥ शरीरावयवाभि
तंयत्तदाभ्यन्तरं॥ यथामनसापाटलिपुत्रं ग
छतिदेवदत्तः॥ चक्षुषारूपंगृह्णाति॥ साधक
तमंकरणमितिकरणसंज्ञा॥ कर्तृकरणयोस्तृ
तियेतिसप्तमीयाः॥ कतमद्विविधंसम्प्रदानं॥ ध्रु
प्रेरकं॥ अनुमन्तृ॥ अनिराकर्तृ॥ तत्रप्रेरकं
संम्प्रदानंयथा॥ ब्राह्मणायगांददातिधार्मिकः॥

सहिब्राह्मणोनरमासाद्यगोमह्यंदेहीतिप्रेरयति॥त
स्मात्प्रेरकमित्युच्यते॥अनुमंतृयथा॥अतिथयेवृक्षम
लंददातितपोधनः॥सह्यतिथिःवृक्षमूलंमह्यंदेहीति
नतावत्प्रेरयतिकिंतुदीयमानमनुमन्यते॥तस्मादनुमंत
इत्युच्यते॥अनिराकर्तृयथा॥पुरुषोत्तमायपुष्पंददाति
पुरुषः॥सपुरुषोत्तमोमह्यंपुष्पंनददातीतिनिराकरो

तितस्मादनिराकर्तृइत्युच्यते॥कर्म्मणायमभिप्रैतीतिसं
प्रदानाच्चतुर्थी॥अपादानंद्विधाचैवतथाधारस्त्रिधातुविधः॥
करोतिकारकंसर्वंतत्स्यतेत्रविवक्षया॥२॥कृतमद्विविधम
पादानेचलमचलंचेति॥तच्चलंयथा॥धावतोरथात्पति
तःसारथिः॥परिधावतोहस्तिनोऽंकुशोधोरणः॥अचलंय
था॥ग्रामादागच्छतिदेवदत्तः॥पर्वतादवतरंतिमहर्षयः॥
ध्रुवमपायेऽवधिरपादानम्॥ततःपंचमी॥कृतमच्चतुर्विधमधि

५ वर्जने ५

पुरुषः दो

करणम्॥अभिव्यापकमौपश्लेषिकंवैषयिकंसामी
पिकंच॥अथव्यापकम्॥तिलेषुतैलंव्याप्तम्॥अथौ
पश्लेषिकम्॥कटआस्तेपुरुषः॥राकटआस्तेविप्रः॥
अथवैषयिकं॥वेणुषुगाईस्थाःवसंति॥सामीपिकंयथा॥
नद्यांवसतिघोषः॥आधारोधिकरणमितिसप्तमी॥यदिकरोतिकारकमित्यर्थसंज्ञातर्हिकर्तैवकार

औपश्लेषिकी वा लैकः

कारकाभिधेयः नतरः॥ अत्रोच्यते॥ तान्यपि कारकाण्येवकु
तः॥ तत्तद्व्यापारेऽपि॥ स्यात्तेऽविवक्षायां प्रतिकारकं
स्यात्तेऽविवक्ष्यते॥ अतः कर्मकरणसंप्रदानापादा
नाधिकरणानामपि कारकत्वंसिद्धम्॥ तत्रेतिकर्तृण्य
भिहितेप्रथमैवविधीयते॥ तृतीयावाथवाषष्ठीस्मृता न
भिहितेतथा॥ ॥ तत्रेतिकर्तृकर्मकरणसंप्रदानापा

दानाधिकरणेषुमध्येऽभिहितेकर्तरिप्रथमैवभवति॥
यथापचत्योदनंदेवदत्तः॥ अनभिहितेकर्तरिद्वि
तीयाभवतेः॥ तृतीयावाथवाषष्ठी॥ अथतृतीया॥ ओद
नःपच्यतेदेवदत्तेन॥ कर्तृकरणयोस्तृतीयाः॥ अथ
षष्ठी॥ परलोकाहितस्यसेव्योधर्मः॥ परलोकहिते
नवासेव्योधर्मः॥ कृत्यानांकर्तरिषष्ठीचेति॥ तथा

कर्म्मण्यभिहितेविभक्तिंविधिपूर्वकाम्॥अनुक्तेप्रथ
मांहीत्वापंचमींसप्तमींतथा॥४॥यथाभिहितेकर्त्त
रिप्रथमा॥तथाकर्म्मण्यभिहितेप्रथमैवभवति॥यथा
ओदनःपच्यतेदेवदत्तेन॥अनुक्तेति॥अनुक्तेकर्म्म
णिप्रथमांपंचमींसप्तमींवर्ज्जयित्वाशेषाश्चतस्रो
विभक्तयोभवंति॥ताःकाःद्वितीयातृतीयाचतुर्थी

षष्ठीचेतिद्वितीयायथा॥ग्रामंगच्छतिपुरुषः॥कर्म्मणि
द्वितीयेतिद्वितीया॥अथतृतीया॥पुत्रेनसंजानीते
पिता॥पुत्रंजानीतइत्यर्थः॥संज्ञोन्यतरस्यांकर्म्मणी
तितृतीया॥चतुर्थीयथा॥ग्रामायव्रजतिपुरुषः॥ग
त्यर्थकर्म्मणीतिचतुर्थी॥षष्ठीयथा॥कटस्यकार
कोदेवदत्तः॥कर्त्तृकर्म्मणोःकृतीतिषष्ठी॥॥तृति

यापंचमीचैवषष्टीचकरणेत्रिधा॥षष्टीचतुर्थीतृप्ति
यासंप्रदानेतथात्रिधा॥५॥परशुनावृक्षंछिनत्ति
देवदत्तः॥कर्तृकरणयोस्तृतिया॥पंचमीयथा॥स्तोका
न्मुक्तः॥स्तोकेनमुक्तः॥करणेचस्तोकाल्पकृच्छ्रतिप
चमी॥षष्टीयथा॥घृतस्यसंजानीतेमित्रम्॥नमित्रं
प्रेक्षतइत्यर्थः॥ज्ञोविदर्थस्यकरणेइतिषष्टी॥पु

रुषमश्वंद्रमसोदातव्यः॥चंद्रमसेदातव्यइत्य
र्थः॥चतुर्थ्यर्थेबहुलंछंदसीतिसंप्रदानेषष्टी॥
चतुर्थीयथा॥क्षुधितायओदनंददातिवैदेदत्तः॥
चतुर्थीसंप्रदानेइतिचतुर्थी॥तृतियायथा॥दास्यामा
लांसंयच्छतेकामुकः॥दास्येमालांददातीत्यर्थः॥स
मस्तृतियेति॥दानश्रद्धासाचेतिचतुर्थ्यर्थेतृतीया॥

येतेनसंभाव्येततृतियाविभक्तिरात्मनेपदविधा
नेचयद्योयंयागस्तुतियाऽयुक्तोद्वानः॥धादान
श्चसाचेच्चतुर्थ्यर्थेइत्यात्मनेपदमनुशास्ति॥अ
सिष्टव्यवहारेतृतियाचतुर्थ्यर्थेभवतीतिवक्तव्यम्
॥असिष्टव्यवहारोधृत्तव्यवहारः॥पंचमीखल्व
पादानवर्त्तिनेनतोन्येया॥सप्तम्यधिकरणेका

रकस्येषसंग्रहः॥७॥इतिकारकम्॥पंचमीयथा॥
पर्वतादवतरन्तिमहर्षयः॥अपादानेतिपंचमी॥
सप्तमीयथा॥ग्रामेवसति॥सप्तम्यधिकरणेचेति
सप्तमी॥कारकस्येतिदिङ्मात्रमत्रप्रदर्शितम्॥को
रकसंग्रहोवृत्यादिषुद्रष्टव्यइत्यर्थः॥इतिवरुरुचि
कृतेप्रयोगविधिविग्रहेप्रथमपटलः॥यत्नेनप्र

तिपालुयेत्॥ ॥ ६ ॥ वदेश्रीपन्नागंडभैरवं॥
इंद्रचंद्रकाशीकृष्णापीसळीरोगकटायणा॥
पाणिनीयमरडैनेंद्रवेयाकरणाष्टास्मृता॥१०॥

कारमी देशे १०॥

कोमदी७ मुग्धबोधे८ मैयाळ्ळ देशे९

ॐनमः॥अथलक्षितोभिहितानभिहितयोःस्वभावः॥किं यत्तत्स्वमभिधायकाअनभिधायकावाउच्यंते॥समासस्तद्धितस्तिङ्कृतेचत्वारोऽभिधायकाःतएवानभिसंबंधान्भवंत्यनभिधायकाः॥८॥अस्यामवस्थायामनभिधायकाःउच्यंतेकर्मणाकर्त्रावाअभिसंबंधेअभिधायकाःउच्यंते॥ताभ्योमेवकर्मकर्तृभ्यामनभिसंबंधेतएवचत्वारोऽनभिधायकाःउच्यंते॥षोढासमासःसंक्षेपोदृष्टाचिं२

त्रातिधापुनः॥नित्यानित्यप्रयोगेनलुकलुकेनचद्विधा
॥ए॥षट्यथा॥तत्पुरुषः॥कर्म्मधारयः॥बहुव्रीहिः॥
द्विगुः॥द्वंद्वः॥अव्ययीभावश्चेतिषट्समासाः॥तएववि
स्तरेणाष्टौविंशतिधाभवंति॥पश्चात्तद्विभागवक्ष्यामः॥
नित्यानित्येतिद्विविधःसमासोभवति॥नित्योऽनित्यश्चेति॥
नित्योयथा॥प्रकर्षेणवरः॥प्रवरः॥कुंभंकरोतीकुंभका

रः॥यदिनित्योयंसमासः॥तदाकुंभंकरोतीतिकथंवाक्यं॥
नेषदोषः॥अरःशब्दोनाव्यर्थःप्रतिपाद्यते॥यथास्त्रीष
धिकृत्यप्रवर्त्ततेअधिस्त्रि॥कर्म्मण्यणित्यण॥उपपद
मतिङितिसमासः॥अनित्यसमासोयथा॥राज्ञःपुरु
षोराजपुरुषःइतिवा॥ब्राह्मणस्यकंबलोब्राह्मणकंब
लइत्यादिषष्ठीसमासः॥विभाषितत्वादनित्यत्वमुच्यते॥
लुगितिलुक्समासोयथा॥कष्टंश्रितः॥कष्टश्रितः॥

द्वितियाश्रितेतिसमासः॥कृत्तद्धितेतिप्रातिपदिक
संज्ञास्सुपोधात्वितिसुपोलुक्॥अलुक्समासेयथा॥
कण्ठकालायस्यसकण्ठकालः॥उरसिलोमानियस्यसउरसिलोमा॥सप्तम्युपमानपूर्वेतिसमासः
कृत्तद्धितेतिप्रातिपदिकसंज्ञायांसुपोधात्वितिलुक्
किमाश्च॥अलुगुत्तरपदइत्यलुग्धर्म्मकस्तत्कालस्वर्गकाम इत्यलुक्समासः॥तत्राष्टधातत्सु

रुषः॥सप्तधाकर्म्मधारयः॥सप्तधाचबहुव्रीहिर्द्विगुराभाषितोद्विधा॥१०॥श्लोकद्वयम्॥प्रथमादिविभक्तिभिःसप्तविधः
नञ्चेति॥तत्रप्रथमातत्पुरुषोयथा॥पूर्वःकायस्यापरोवापूर्वकायः॥अपरकायः॥पूर्वापरावराधरोत्तरमेकदिग्नीति
समासः॥अर्द्धपिप्पल्याःकोशातक्यावाअर्द्धपिप्पली॥
अर्द्धकोशातकी॥अर्द्धनपुंसकमितिसमासः॥द्वितीयाभिक्षायाः॥द्वितीयभिक्षा॥भिक्षाद्वितीया॥एवंतृतीयादि॥

द्वितीयतृतीयचतुर्थतुर्येति समासः॥प्राप्तोजीविकंप्रा
प्तजीविकः॥एवमापन्नजीविकः॥प्राप्तापन्नैचेति समा
सः॥कस्मात्प्रथमातत्पुरुषोयंभवति॥उच्यते पूर्वपदस्य
प्रथमान्तत्वात्॥याविभक्तिःपूर्वपदस्यभवतिसैतयाविभ
क्त्याविग्रहेतत्प्रथमातत्पुरुषइत्युते॥द्वितीयातत्पुरुषोय
था॥वृक्षंश्रितःवृक्षश्रितः॥कान्तारमतीतःकान्तरातीतः
॥नरकंपतितोनरकपतितः॥ग्रामंगतोग्रामगतः॥सुख

त्यस्तः॥सुखात्यस्तः॥तरङ्गमत्यस्तः॥तरङ्गात्यस्तः॥सुखमा
पन्नः॥सुखापन्नः॥द्वितीयाश्रितातीतपतितगतात्यस्तप्रा
प्तापन्नैरितिसमासः॥वर्षभोग्योवर्षभोग्यः॥योजनंप्रेरि
तोरितोयोजनप्रेरितः॥कालाध्वनोरत्यन्तसंयोगइतिद्विती
या॥अत्यन्तसंयोगेचेतिद्वितीयासमासः॥तृतीयातत्पुरु
षायथा॥शङ्कुलयाखण्डः॥शङ्कुलाखण्डः॥तृतीयातत्कृ
तार्थेतिसमासः॥मासेनपूर्वः॥मासपूर्वः॥वाचानि

पुणोवाड्डि॰पुणः॥पूर्वसदृशसमेतिसमासः॥चतुर्थीत
त्पुरुषोयथा॥यूपायेदारु॥यूपदारु॥कुंडलायहिरण्यम्
॥कुंडलहिरण्येन॥तादर्थ्येचतुर्थीअर्थेननित्यसमास
वचनंसर्वलिङ्गतावक्तव्या॥ब्राह्मणायअर्थंब्राह्मणा
र्थःसूपः॥ब्राह्मणार्थभूः॥ब्राह्मणार्थपयः॥ब्राह्मणबलि
रित्यादि॥चतुर्थीतदर्थार्थेतिसमासः॥पंचमीतत्पुरुषोय
था॥सिंहाद्भयं॥सिंहभयम्॥पंचमीभयेनेतिसमासः॥

श्री

अर्थादपेतः॥अर्थापेतः॥सुखादयोढः॥सुखापोढः॥अ
यतापाढेतिसमासः॥षष्ठीतत्पुरुषोयथा॥वृक्षस्यमूल
म्॥वृक्षमूलम्॥षष्ठीतिसमासः॥ब्राह्मणस्ययाजकोब्रा
ह्मणायाजकः॥याजकादिभिश्चेतिसमासः॥सप्तमीतत्पु
रुषोयथा॥अक्षेषुशौण्डः॥अक्षशौंडः॥सप्तमीशौंडै
तिसमासः॥पाटलिपुत्रेसिद्धः॥पाटलिपुत्रसिद्धः॥सि
द्धशुष्केतिसमासः॥नञ्तत्पुरुषोयथा॥नब्राह्मणोअ

MEMORIAL

चकारबहवो द्वंद्वः स चासौ कर्मधारयः ॥ यस्यास्ति बहुव्रीहिरोषतसूरसमर्थः ॥
ब्राह्मणः ॥ नञिति समासः ॥ सप्तधा कर्मधारयः ॥ कृत्तमः ॥
विशेषणपूर्वः ॥ विशेष्यपूर्वः ॥ विशेषणोभयपदः ॥ उप
मानपूर्वपदः ॥ उपमानोत्तरपदः ॥ संभावनापूर्वपदः ॥ अ
वधारणापूर्वपदः ॥ इति सप्तधा कर्मधारयः ॥ तत्राद्योय १५
था ॥ नीलं चतदुत्पलं चनीलोत्पलं ॥ कृत्सर्पः ॥ विशेष
णं विशेष्येण बहुलमिति समासः ॥ द्वितीयोयथा ॥ वैया कर
णश्चासौ खमुचिश्चेति वैयाकरणखमुचिः ॥ मूर्खानि
कुम्भः

प्रतिलः ॥ कुत्सनानि कुत्सनैरिति समासः ॥ तृतीयोयथा
॥ शीतंचतदुष्णं चशीतोष्णम् ॥ अत्रापि विशेषणं विशेष्ये
णेति समासः ॥ चतुर्थीयथा ॥ शंखइवपांडुरः ॥ शंखपांडुरः ॥
उपमानानि सामान्यवचनैरिति समासः ॥ उपमानोत्तरपदो
यथा ॥ नरोयंसिंहइव नरसिंहः ॥ पुरुषोयंवृषभइव पुरुषवृ
षभः ॥ उपमितंव्याघ्रेति समासः ॥ षष्ठीयथा ॥ गुणइतिबुद्धिः
॥ गुणबुद्धिः ॥ पुत्रइतिग्रहणं ॥ पुत्रग्रहणं ॥ विशेषणं विशेष्य

ण बहुलमितिसमासः॥सप्तमीयथा॥गुणएवधनंयस्य॥सु
हृत्एवबंधुः॥सुहृद्बंधुः॥मयूरव्यंसकेतिसमासः॥सप्त
म्याचबहुव्रीहिः॥द्विपदः॥बहुपदः॥संख्योत्तरपदः॥सं
ख्योभयपदः॥सहपूर्वपदः॥व्यतिहारलक्षणः॥दिगंत १६ ॥१६॥
रालक्षणश्चेति॥आरूढोवानरोयंवृक्षंसभवत्यारूढ
वानरोवृक्षः॥इतिद्विपदः॥निर्जितिकामः॥उपनीतभोजनः
॥निष्क्रांतोजनोयस्मात्तेनिष्क्रांतजनंनगरं॥शुष्कपटः॥

उषितविभवः॥रोषोबहुव्रीहियधिकृत्यअनेकमन्यपदार्थे
तिसमासः॥बहुपदोयथा॥परोक्रमोपार्जितसंपदः॥तृती
योयथा॥उपसमीपेदत्तानाम्॥उपदत्ताःपुरुषाः॥उपविंशाः
॥चतुर्थीयथा॥द्वौवात्रयोवाद्वित्राः॥संख्याव्ययेतिसमासः॥
यि बहुव्रीहौसंख्येऽजिति॥चसमासांतः॥पंचमीयथा॥सह
मूलेनोद्धृतस्तरुःसहमूलोद्धृतस्तरुः॥तेनसहेतिसमासः॥
वोपसर्जनस्येतिसहशब्दस्यवासभावः॥व्यतिहारलक्ष

णोयथा॥केशेषुकेशेषुगृहीत्वाइदंयुद्धप्रवृत्तम्॥केशाकेशि॥दंडादंडि॥तत्रतेनेदमितिसमासः॥अन्येषामपि दृश्यतइतिदीर्घत्वम्॥इचःकर्म्मव्यतिहारइतिइचस्मासांतःपस्यतिचेयकारलोपः॥तिष्ठद्गुप्रभृतीनिच्चेयव्ययीभावः॥अव्ययीभावश्चेत्यव्ययसंज्ञायाम्॥अव्ययात्सुपितिसुपोलुक्॥दिगंतरालक्षणायथा॥दक्षिणास्याश्चपूर्व्वस्याश्चदिशोर्य्यदंतरालंसादक्षिणापूर्व्वा॥

अव्ययाद्विभक्तेर्लुक्॥अव्ययाद्विभक्तेर्लुक्भवति॥

उत्तरपूर्व्वा॥दिग्नामान्यंतरालइतिसमासः॥सर्व्वनाम्नोवृत्तिमात्रेपूर्व्वपदस्यपुंवद्भावः॥द्विगुर्द्विविधः॥एकवद्भावीअनेकवद्भावीचेति॥एकवद्भावीयथा॥त्रीणिश्रृङ्गाणिसमाहृतानिइतित्रिश्रृङ्गम्॥पंचमलुप्॥तद्धितार्थोत्तरपदसमाहारेचेतिसमासः॥संख्यापूर्व्वोद्विगुः॥द्विगुसंज्ञायाम्॥द्विगोरेकवचनम्॥सनपुंसकम्॥अकारांतोत्तरपदोद्विगुः॥स्त्रियांभाव्यतइतिस्त्रिलिङ्गतायांद्वि

गोरितिङीप्॥त्रिमृङ्गादिभ्यस्तुनभवति॥पात्रादिभ्यः
प्रतिषधोवक्तव्यःइति॥अनेकवद्भावीयथा॥चतस्रोदि
शाश्चतुर्दिशम्॥त्रयोलोकाः॥त्रिलोकम्॥दिक्संख्येसं
ज्ञायांइतिसमासः॥द्वंद्वश्चतुर्विधोज्ञेयोऽव्ययीभावोद्वि ॥१८॥
धामतः॥तेषांपुनःसमासानांप्राधान्यंस्याच्चतुर्विधम्॥१॥
द्वंद्वश्चतुर्विधःकथम्॥समुच्चयः॥समाहारः॥अन्वा
२ चयः॥इतरेतरयोगश्च॥तत्रसमुच्चयान्वाचयोरसाप्र

र्थ्यात्समासोनास्ति॥समर्थःपदविधिरित्यधिकारात्॥स
मुच्चययथा॥देवदत्तःपचतियज्ञदत्तश्च॥अन्वाचयोय
था॥भिक्षामटगांचानय॥समाहारोयथा॥शंखश्चपट
हश्चशंखपटहम्॥द्वंद्वश्चप्राणितूर्यसेनांगानांदिवद्भावः॥सनपुं
सकमज्ञः॥इतरेतरयोगोयथा॥देवदत्तश्चयज्ञदत्तश्च
देवदत्तौयज्ञदत्तौ॥चार्थेद्वंद्वः॥अव्ययीभावोद्विधामतः॥
नामपूर्वपदोऽव्ययपूर्वपदोपि॥तत्राद्योयथा॥शाकस्य

मात्रा॥शाकंप्रति॥फलंप्रति॥प्रतिशाकम्॥प्रतिफलम्॥
सुप्रतिनामात्रेतिसमासः॥अव्ययपूर्वपदोयथा॥कुंभस्य
समीपेवर्त्ततइत्युपकुंभम्॥अव्ययविभक्तीतिसमासः॥क्र
मशनतिक्रम्यवर्त्ततइतियथाक्रमं॥येयेवृद्धाःयथावृद्धं ब्रा
ह्मणानामंत्रयस्व॥यथासादृश्येतिसमासः॥यावदमंत्रं
ब्राह्मणानामंत्रयस्व॥यावंयमंत्राणिसंभवंतितावंतो
ब्राह्मणानामंत्रयस्व॥यावदवधारणेतिसमासः॥तेषामि

तिपूर्वपदार्थप्रधानउत्तरपदार्थप्रधानोऽन्यपदार्थप्र
धानउभयपदार्थप्रधानश्चेतिसमासश्चतुर्हा॥तत्पु
रुषोद्विःप्रधानः॥पूर्वोत्तरप्रधानइति॥पूर्वेयथा॥पु
रुषर्षभः॥उत्तरेयथा॥नीलोत्पलम्॥बहुव्रीहिर्द्विः
प्रधानः॥अन्योभयपदापदार्थप्रधानएव॥अन्योयथा॥
द्विगुरेकप्रधानः॥यथाशंखपटहम्॥उभयोयथा॥
द्वौवात्रयोवाद्वित्राः॥द्विगुरुत्तरपदार्थप्रधानएव॥यथा

त्रिमृदङ्गम्॥पुंचमूलम्॥अव्ययीभावस्त्रिप्रधानम्॥पूर्वो
त्तरान्यपदार्थप्रधानेति॥पूर्वोयथा॥उपकुंभम्॥उत्तरोयथा॥
प्रतिशाकम्॥अन्योयथा॥उन्मत्तगंगायस्मिन्देशे स
भवत्युन्मत्तगंगदेशः॥अन्यपदार्थेचसंज्ञायामितिसमा
सः॥स्त्रियाःपुंवद्भावितपुंस्केतिपुंस्त्वम्॥॥इतिसमास
लक्षणं॥॥कष्टेनलिखितंग्रंथंयत्नेनप्रतिपालयेत्॥

२०

२०

२१

ॐनमः॥अथप्रातिपदिकसंज्ञाविधायकसूत्राणिउच्यते॥सामान्याव्यय
भावाख्यस्त्रिविधस्तद्धितोमतः॥पदानांमूलमर्थानांप्रथमा
द्याप्रभ्रियते॥१२॥सामान्यवृत्तिः॥अव्ययसंज्ञः॥भाववचनश्चे
तित्रिप्रकारः॥सचपदानांमूलेकेषांपरस्परसमर्थानांप्र
थमादेवपदात्तद्धितप्रत्ययःप्रभ्रियते॥तत्रसामान्यवृत्ति
स्तावत्॥मतुप्॥लुच्॥इलच्॥शः॥नः॥इलच्॥णः॥उरच्॥
रः॥वः॥वलच्॥ठनिः॥ठन्॥विनिः॥युस्॥ञिनिः॥आलच्॥
आटच्॥इनच्॥आरकच्॥आलुच्॥चेलुच्॥ऊलः॥ऊलच्
॥तिप्तिञ्चित्रिः॥

MEMORIAL

मांतोपधाद्वत्तिनोः॥ यमेयमावा॥पदांतेनमान्नाश्रुपाक्षमेयमाभवंति
यमसयमहीतात्॥यमेपरस्तिमोमिकस्यनभवंति ६
:॥अण॥वुन्॥खञ्॥ञ्य॥इञ्॥फक्॥यञ्॥ढक्॥एय
क्॥ढक्॥ञ्मारक्॥यूः॥खः॥एयः॥यत्र॥इन्॥इतच॥ञ्मन
ङ्॥चेश्वुप्॥इष्ठन्॥इयसुन्॥तरप्॥तमप्॥कल्पप्॥देश्य
॥देशीयन्॥जातीयन्॥रूप॥द्वयसच॥दघ्नञ्॥मात्रच॥ह
क्॥इतिषड्वुप्प्रत्ययाभवन्ति॥तत्रमतुपयथा॥गुण
यस्यास्तियस्मिन्वा॥सगुणवान्गुणवतिस्त्री॥गुणवत्कुल २१
म्॥तदस्यास्तिन्तिमतुप्॥मादुपधायाश्चमतोर्वोऽयवा
दिभ्यः इतिमस्यवः॥वलचयथा॥चूडायस्यास्तियस्मि

स्स ॥ मांतोपधाद्वत्तिनोः॥ अमरधमळ

यस्यलोपः॥अश्वरश्वयः॥तस्यलोपोभवतिस्वरमकारेचपरे॥

न्वा॥सचूडालः॥प्राणिस्यादीतेलञन्यतरस्यामितिलच॥
वत्सेकामयतइतिवत्सलः॥प्रंसोस्यास्तीति॥प्रंसलः॥वत्सा
सान्त्यांकावलेइतिलेच॥इलचयथा॥फेनोऽस्यास्तीतिफे
निलः॥फेनादिलश्चेतीलच॥तुन्दोस्यास्तीतितुन्दिलः॥तु
न्दादिभ्यश्चेतीलच॥शोभयथा॥लोमानिसन्तियस्यसलो म
शः॥भोयथा॥पामयस्यास्तीतिसपामनः॥इलचयथा॥पि
छंयस्यास्तीति॥सपिछिलः॥लोमादिपामादिपिछादिभ्यः
शनेलचः॥णोयथा॥प्रज्ञायस्यास्तीतिसप्राज्ञः॥श्रद्धाय
आदिस्वरस्यञ्णितिचवृद्धिः॥

स्यास्तीति सश्राद्धः॥ ऋचः॥ वार्त्तः॥ प्रज्ञाश्राद्धा वृत्तिभ्योणः
:॥ उरच्च यथा॥ दन्ता उन्नता यस्य सदन्तुरः॥ दन्तउन्नतउर
च॥ रो यथा॥ मधु यस्यास्तीति मधुरः॥ ऊषसुखिमुष्कम
धोरः॥ वो यथा॥ केशो यस्यास्तीति सकेशवः॥ केशाद्वोऽ
न्यतरस्याम्॥ विप्रकरणमणिहिरण्ययोरूपसंख्यानम्
॥ मणिर्य्यस्यास्तीति समणिवः॥ हिरण्यं यस्यास्तीति सहिर
ण्यवः॥ वलच्च यथा॥ रजो यस्यास्तीति सरजस्वलः॥ स्त्री
चेड्रजस्वला॥ रजःकृष्यासुतिधंनिकः॥ अतइनिठनौ॥

२२

२२

श्री

ठस्यकः॥ विनिर्य्यथा॥ यत्नोऽस्यास्तीति यत्नी॥ अस्मा
यामेधास्रजोविनिः॥ युस्यथा॥ ऊर्णायुस्यास्तीति सऊर्णा
युः॥ ऊर्णायाः युस्॥ ग्मिनिर्य्यथा॥ वाग्ऽस्यास्तीतिवाग्मी॥
वाचोग्मिनिः॥ भूरोभूरीतिकलोपः॥ आलच्च यथा॥ योब
हुसंबद्धभाषतेसवाचालः॥ अटच्च यथा॥ योबहुसंबद्ध
धंभाषतेसवाचटः॥ आलयाम्नाटचोबहुभाषिणीति॥
इनच्चयाम्॥ फलानियस्यसंतिसफलिनः॥ बहुनिय

अस्यार्थः

था॥

स्य संति सबर्हिणः॥ फलबर्हाभ्यामिति वक्तव्यमिति॥
आरक्च यथा॥ शृंगं यस्यास्तीति सशृङ्गारकः॥ वृंदं
यस्यास्तीति सवृंदारकः॥ शृङ्गवृंदाभ्यां मारक चुवक्त
व्यं॥ आलुच यथा॥ निद्रा यस्यास्तीति सनिद्रालुः॥ २६॥
तन्द्रालुः॥ श्रद्धालुः॥ निद्रातन्द्राश्रद्धाभ्य आलुच॥
शीतालुः उष्मालुः॥ तृषालुः॥ शीतोष्णतृषाभ्यस्तन्न
सहते इति आलुचवक्तव्यः॥ ऊलो यथा॥ वातसहो

यस्येलोपः॥ इश्चअश्चयः॥ तस्येलोपोभवतिस्वरेयकारेचपरे॥ इकारअकारयोलो
पहोतेस्वरयकारपरअस्तो
मूहो वातहलः॥ वातादूलोवक्तव्यः॥ द्वितीयऊलो यथा॥
वातंनसहतइतिवा वातान्सम्हेतन्नसहतइत्य
लोवक्तव्यः॥ अण् यथा॥ वसिष्ठस्यापत्यं॥ वासिष्ठः॥ क्ष
ष्यन्धकवृष्णिकुरुभ्यश्चेत्यण्॥ उपगोरस्यापत्यमौ
पगवः॥ आग्दीमतोऽणित्यधिकृत्यतस्यापत्यमि
त्यण्॥ अश्वपत्यादिभ्यश्च॥ जनपदोनिवासो यस्य
सः जानपदः॥ सोस्यनिवासः॥ वैयाकरणः॥ तद्

अरिस्वरस्यञ्णिति परवृद्धिः

धीतेतद्वेद ॥ नद्याभ्यांपदान्ताभ्यांपूर्वौतुताभ्यामैयौ
जागमः ॥ वुन्यथा ॥ क्रममधीतेवेत्तिवा ॥ क्रमकः
॥ क्रमादिभ्योवुन्निति वुन् ॥ युद्योरनाकाविष्यका
देशः ॥ खञ्यथा ॥ पञ्चालस्यापत्यंपाञ्चालः ॥
वैदेहः ॥ जनपदशब्दात्क्षत्रियादञ् ॥ अत्सञ्
त्सादिभ्योऽञ् ॥ इञ्यथा ॥ दक्षस्यापत्यंदाक्षिः ॥

२४ २४

दाशरथिः ॥ अतइञ् ॥ फक्यथा ॥ नडस्यापत्यंनाडा
यनः ॥ आश्वलायनः ॥ नडादिभ्यः फक् ॥ यञ्यथा ॥
गर्गस्यापत्यंगार्ग्यः ॥ गर्गादिभ्योयञ् ॥ ढक्यथा
॥ विनतायाः अपत्यंवैनतेयः ॥ गाङ्ग्यः ॥ स्त्रीभ्योढ
गितिढक् ॥ एरक्यथा ॥ चटकायाः अपत्यंचाट
कैरः ॥ चुटकायाः एरक् ॥ ढक्यथा ॥ गोधायाः
अपत्यंगौधेयः ॥ गोधायाः ढक् ॥ लोपोव्यीघ्रलीति

यलोपः ॥ आरकृ यथा ॥ गोधायाः अपत्यं गोधारः ॥
चारगुदीचाम् ॥ छो यथा ॥ क्षत्रस्यापत्यं क्षत्रियः ॥
क्षत्रात्वः ॥ इयादेशः ॥ खो यथा ॥ कुलस्यापत्यं कुली
नः ॥ कुलात्खः ॥ खस्येनादेशः ॥ ण्य यथा ॥ कुरो
रपत्यं कौरव्यः ॥ कुरादिभ्यो ण्यः ॥ यत् यथा ॥ मूर्द्धि
भवो मूर्द्धन्यः ॥ उरसिभवः ॥ उरस्यः ॥ एवं दन्त्यः ॥

शरीरावयवाद्यत् ॥ इन यथा ॥ कल्याणोगन्धोय
स्यससुगंधिः ॥ उद्गन्धिः ॥ गंधस्येदुत्सुसुरभे
यः ॥ कुमुदगन्धिः ॥ कारीषगान्धिः ॥ सप्तम्युपमानपूर्व
स्यबहुव्रीहेश्चोत्तरपदलोपश्च ॥ उपमानाच्चेतीसेमा
सान्तेः ॥ इतच् यथा ॥ कुसुमानिसंजातानियस्मिन्न
कुसुमितोवृक्षः ॥ तदस्यसंजातंतारकादिभ्यइतच् ॥
अनउ यथा ॥ कुंउप्रमानमूधोयस्याः सा कुंडोध्नीः ॥

MEMORIAL

ऊधसोऽनङ्॥सकारस्यअनङादेशःअत्ययसंज्ञा
च॥बहुव्रीहेरूधसोङीष्॥कुरुकमनेवधनुर्यस्यस
कुसुमधन्वा॥धनुषश्चेत्यनङ्॥सकारस्यसमासा
न्तः॥चरणपूरणार्थेविन्॥दर्भाश्चरणांश्च॥चक्षु २६॥ २६
पयथा॥शाछेनविन्॥शाछंचक्षुः॥तेनविन्नश्चक्षु
पूरणयोः॥चक्षेर्दृइतिदृसंज्ञातन॥तस्यरूपस्यानि
त्यत्वात्॥इष्टनेयथा॥सर्वेइमेपटवः॥अयमति

शायेनपटुः॥पटिष्ठः॥अतिशायनेतमविष्ठनौ॥तु
रिष्ठेमेयस्सुटेलोपः॥अतिशायेनप्रियःप्रेष्ठः॥
अतिशायेनस्थविरः॥स्थविष्ठः॥स्फेष्ठः॥वरिष्ठः
॥बर्हिष्ठः॥गरिष्ठः॥वषिष्ठः॥त्रपिष्ठः॥द्राघिष्ठः॥
वृन्दिष्ठः॥प्रियस्थिरस्फिरोबहुलगुरुवृद्धतृप्त
दीर्घवृन्दारकाणांप्रस्थस्फवंबर्हिगर्वर्षित्रपद्रा
घिवृन्दाः॥प्रकृत्यैकाजितिप्रकृतिभावः॥अतिशा

येनस्थूलः स्थविष्टः ॥ एवं दूरः ॥ युवा ॥ ह्रस्वः ॥ क्षुद्रः ॥ दविष्टः ॥ यविष्टः ॥ ह्रस्विष्टः ॥ क्षोदिष्टः ॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि परं एच्चास्य चगुणः ॥ सर्वेषामतिशायेनबहुः ॥ भूयिष्टः ॥ बहोर्लोपो भूच बहोरिति प्रत्ययैकारस्य लोपः ॥ बहोर्वस्य भूरादेशः ॥ इष्टस्य यिट्इति यिडागमः ॥ सर्वेषामतिशायेनप्रशस्यः ॥ श्रेष्ठः ॥ प्रशास्यस्य श्रइति श्रा

देशः ॥ लघुमृदुकृशाणूनां ॥ लघिष्ठः ॥ मृदिष्ठः ॥ कृशिष्ठः ॥ प्रथिष्ठः ॥ ऋतोहलादेर्लघोरितिऋकारस्य रादेशः ॥ तुरिष्ठेमेयस्सु इतिवर्त्तमानेटेरितिटेर्लोपः ॥ अन्तिकः ॥ नेदिष्ठः ॥ वाटः ॥ वाटिष्ठः ॥ साधिष्ठः ॥ अन्तिकबाढयोर्नेदसाधो ॥ नन्निष्ठः ॥ अणिष्ठः ॥ क्षेपिष्ठः ॥ स्यामिष्ठः ॥ हरि

ष्टः॥पिञ्जरिष्टः॥इयसुनयश्च॥द्वाविमौपटू॥
अथमनयोरतिशयेनपटुः॥पटीयान्॥स्थूलः॥
स्थवीयान्॥ह्रस्वः॥ह्रस्वीयान्॥युवा॥यवीयो॥
कनिष्टः॥कनीयान्॥युवाल्पयोःकनन्यतर
स्यात्॥क्षिप्रः॥क्षेपीयान्॥स्थिरः॥स्थेयान्॥
प्रियः॥प्रेयान्॥उरुः॥वरीयान्॥लघुः॥लघी

यान्॥तप्तः॥त्रपीयान्॥दीर्घः॥द्राघीयान्॥वृ
न्दारकः॥वृन्दीयान्॥महान्॥महीयान्॥सा
धुः॥साधीयान्॥कृशः॥कृशीयान्॥क्षमः॥
क्षमीयान्॥मृदुः॥म्रदीयान्॥दृढः॥द्रढीया
न्॥ज्येष्टः॥ज्यायान्॥॥ज्यायादीपसइतीयसु
न्॥कारस्यात्वम्॥अल्पः॥अल्पीयान्॥स्या

मः॥श्यामीयान्॥पिञ्जरः॥पिञ्जरीयान्॥द्वि
वचनविभक्तौपपदेनस्त्रीयसुतौ॥तरएयप्
था॥अतिशायनकुमारः॥कुमारतरः॥एवंप
टुः॥पटुतरः॥मृदुः॥मृदुतरः॥क्रूराः॥क्रूरा
तरः॥लघुः॥लघुतरः॥द्विवचनोतितरप्॥
अतिशायेनपक्वतिपक्वतितराम्॥जल्पतितराम्॥

॥तिङ॰श्चेतितितरम्॥किमेत्तिङ॰व्ययादाख्याद्रव्यप्रक
र्षइष्यामि॥समयायथा॥सर्वासामतिशायनमृद्वी॥मृदुतमा॥
चपलतमा॥अतिशायनेतमविष्ठनौ॥कल्प्यपूयथा॥ई
षदूनेद्रोनसमाप्तौद्वितिइंद्रकल्पः॥देश्यायथा॥ईष
त्पर्वतोनसमाप्यतेइतिपर्वतदेश्यामेघः॥देशीयन्यथा॥
ईषज्जानसमाप्यतेइतिजानदेशीयः॥ईषदपरिसमाप्तौ
कल्पदेश्यदेशीयरः॥जातीयन्यथा॥पटुःप्रकारः॥प

दु जातीयः॥मृदु जातीयः॥सम् जातीयः॥प्रकारवचने
जातीयर्॥रूपाय्यथा॥प्रशस्तोवेयाकरणोवेयाकर
णरूपः॥प्रशस्तःपटुःपटुरूपः॥प्रशंसायांरूपः॥द्वय
सचयथा॥ऊरुःप्रमाणमस्यऊद्वयंसजलम्॥दद्वयेय
था॥जानुप्रमाणमस्येतिजानुदद्वे जलम्॥मात्रच्चयथा॥
आस्यप्रमाणमस्येति॥आस्यमात्रम्॥परिमानेद्वयस
चदघ्नञमात्रचः॥ठकयथा॥द्वारेनियुक्तः॥दैवारि

र्द्वि

कः॥तत्रनियुक्तइतिठकू॥द्वारादीनांचेत्यैजागमः॥अ
क्षैर्द्दिव्यतीति॥आक्षिकः॥खानित्रिकः॥खनित्रेणख
नतीत्यर्थः॥मुष्टिनाजयतिइतिमौष्टिकः॥तेनदीव्यति
खनतिजयतिजितम्॥इतिठकू॥ठस्येकः॥कितिचेया
दिवृद्धिः॥इतिसामान्यतद्धिताः॥यादृशंपुस्तकंदृष्ट्वा
तादृशंलिखितंमया॥यदिशुद्धमशुद्धंवामम्मदोषोन
दीयते॥१॥भग्नपृष्ठिकटिग्रीवाबद्धमुष्टिअधोमुखं॥

कष्टेनलिखितंग्रथंयत्नेनप्रतिपालयेत्॥२॥समस्त
गुरुवेनमः॥श्री॥
ॐनमस्तेत्रिवारंप्रणवसहितंयोब्रूवीतिप्रदोषेपश्यन्नेवेतिलिंगे
॥१॥ वषट्षणाकरःशृंगमध्येसदाभ्यर्चा॥सर्ववेदानधीत्यक्रमप ॥२॥
दसहितामंत्रकोट्यस्तुसप्तत्रैलोक्यंतस्यवश्यंसभव
तिशिवसायुज्यवान्धुत्तपापान्॥१॥ॐनमःशिवाय॥२॥
ब्राह्मणास्यगुदंशांखरदक्षंदुर्गास्तवं॥भस्मिस्परीमात्रेण
शत्रुस्यापिश्रियंहरेत्॥ ॥

अथाव्ययस्तद्धितःकृतमः॥तसिल॥१॥अल॥२॥
अधुना॥३॥दानीम्॥४॥दा॥५॥हिल॥६॥हि॥७॥अ
त॥८॥थाल॥९॥थम्॥१०॥अस्तातिः॥११॥सधस॥१२
॥उत॥१३॥अलिर॥१४॥समसिण॥१५॥एद्यवि॥१६॥
द्य॥१७॥एद्युस॥१८॥असुच॥१९॥असुच॥२०॥आति
रिल॥२१॥रिष्टातिः॥२२॥एनपू॥२३॥आच॥२४॥
आहि॥२५॥धा॥२६॥च्यमुञ॥२७॥एधाच॥२८॥रा

MEMORIAL

येनप्रकारेणयथा॥
अव्ययम्च
प्॥२९॥आम्॥३०॥इतित्रिंशत्संज्ञायाः॥तसिलादयथा॥
यस्मात्ततः॥तस्मात्ततः॥प्राग्दिशोविभक्तिरितिवि
भक्तिसंज्ञा॥त्यदादीनामः॥इदमइश्॥इतः॥एतस्माद
तः॥एतदोऽसुइति॥अरमावः॥तद्धितश्चासर्वविभक्तेः॥अव्यय ३२
त्वम्॥अव्ययादाप्सुपइति॥सुपोलुक्॥आदोइत्यादितः
॥अन्येभ्योपिदृश्यतइतिवक्तव्यम्॥किंसर्वनामब
हुभ्योऽद्व्यादिभ्यइत्यनेनाधिकृत्यपञ्चम्यास्तसिलु॥

अव्ययादिभ्यस्तसिलुक्॥अव्ययादिभ्यस्तसिलुक्भवति॥

त्रलादयथा॥तस्मिन्ततत्र॥अमुस्मिन्नमुत्र॥सप्तम्या
स्त्रल्॥अदसोसेरित्यस्यात्वमत्वंच॥अधुनायथा॥अ
स्मिन्कालेइदानीं॥दानीञ्इतिदानीम्प्रत्ययः॥इदमइ
तीसुभावः॥दायथा॥सर्वस्मिन्कालेसर्वदा॥एकस्मि
न्कालेएकदा॥अन्यदा॥कदा॥यदा॥तदा॥सर्वैका
न्यकिंयत्तदःकालेदाइतिदाप्रत्ययः॥सर्वस्यसोन्य
तरस्याम्॥हिलादयथा॥तस्मिन्काले॥तर्हि॥अनद्यत

नेर्हिलन्यतरस्याम्॥अस्मिन्काले॥एतर्हि॥इदमोर्हिल॥
एतेतौरथोरितिरफ्यंयोःपरयोःएतदृतआदेशोस्तः॥
हयथा॥अस्मिन्काले॥ईह॥इदमाहः॥इदमइश्॥कु
हः॥वाहचछन्दसीतिवाहः॥कुतिहोरितिकिमःकु
आदेशाः॥अत्यथा॥क॥किमोऽत्॥कातीतिकादे
शाः॥थालयथा॥येनप्रकारेणयथा॥तेनप्रकारेणते
था॥सर्वथा॥प्रकारवचनेथाल॥थम्यथा॥अनेन

एतदृत

प्रकारेणइत्थम्॥इदमस्थमुरितिथम्॥एतेतौरथोरि
तिइदोदेशाः॥कथम्॥किमश्चेतिथम्॥किमःकः॥अस्ता
तिर्यथा॥पूर्वस्यांदिशिवसतिपूर्वस्याःआगतोवापुरस्ता
दागतःपूर्वःरमणीयः॥पुरस्तादमणीयः॥दिक्शब्दे
भ्यःसप्तमीपञ्चमीप्रथमाभ्योदिग्देशकालेष्वस्ता
तिः॥पूर्वापराधरोत्तरमेषाम्॥सद्यस्यथा॥

समानेह्नि सद्यइति निपात्यते॥सद्यपरुत्परार्यैति समा
नस्य संभावोद्यश्च प्रत्ययोऽहन्यभिधीयते॥उतयथा॥
पूर्वस्मिन्वत्सरेपरुत॥आरिलयथा॥पूर्वतरवत्सर
परारि॥पूर्वतरस्यपरभावः॥उदारिलोतोप्रत्ययो भ
वतः॥संवत्सरेभिधेये॥समसिणयथा॥अस्मिन्वत्स
रे॥एषमः॥इदमशब्दस्समसिण॥इदमइन्भावः॥त

द्धितेचचामादेः॥आदिवृद्धिः॥एद्यवियथा॥परति॥उ
परिष्टात्॥ऊद्धशब्दस्यउपभावः॥रिलरिष्टातिएतोप्र
त्ययोभवतः॥एनचयथा॥पूर्वेणादेशोरमणीयः॥पू
र्वेदेशोरमणीयइत्यर्थः॥एनचन्यतरस्यामदूरपश्चे
म्याः॥आचयथा॥दक्षिणादेशोरमणीयः॥दक्षिणा
दाच॥आहियथा॥दक्षिणस्यांदिशिमस्यदूरवस
तिदक्षिणाहि ग्रामाद्वसति॥आहिचदूरइत्योहिप्र

त्ययः॥धाप्रथा॥कतिप्रकाराः॥बहुधा॥संख्यायाःविधार्थेधा॥च्यमुञ्प्रथा॥एकधा॥एकध्यंकरु॥एकध्यंकुरु॥एकाद्धाध्यमुञन्यतरस्याम्॥धमुञ्प्रथा॥द्वैधम्॥त्रैधम्॥द्वित्र्योश्चधमुञ्॥एधाच्चयथा॥द्वेधा॥त्रेधा॥एधाच्च॥पाञ्प्रयथा॥प्रयस्याम्॥आम्प्रथा॥रन्तरमेवचिरंतराम्॥सुष्ठुतराम्॥अतितराम्॥किमेतिङव्ययघादाचाद्रव्यप्रकर्षे॥श्री॥इत्यव्ययवा

भावाख्यस्तद्धितः

चैकैस्तद्धितःकतमः॥त्व॥तल॥इमनिच॥ख्यञ्॥यत्॥य॥ढक्॥यक्॥अञ्॥अण्॥चुञ्॥इत्येकादशप्रत्ययाः भवंति॥त्वयथा॥पटोर्भावःपटुत्वं॥तलयथा॥पटोर्भावःपटुता॥तस्यभावस्त्वतलौ॥इमनिचयथा॥गुरोर्भावः॥गरिमा॥पटिमा॥अणिमा॥तनिमा॥स्थूलस्यभावःस्थविमा॥दीर्घस्यभावः॥द्राघिमा॥बहोर्भावः॥भूमा॥चेतसोभावः॥चेतिमा॥कृच्छ्रस्यभावः॥कृच्छ्रिमा॥पृथ्यादिभ्य

इमनिज्वा॥ख्यञ्यथा॥श्वेतस्यभावः श्वेत्यम्॥नैत्य
म्॥दृढस्यभावः॥दार्ढ्यम्॥सुभगस्यभावः सौभाग्य
म्॥वर्णाद्वादिभ्यः ष्यञ्च॥हृद्भगसिन्ध्वन्तपूर्वपद
स्यचेतिउभयपदवृद्धिः॥यत्यथा॥स्तेनस्यभावःस्तेन्यम्॥स्तेनाद्यन्नलोपश्चेतियत्॥योयथा॥सख्युर्भा
भवः सख्यं॥सख्युर्य्यडितियः॥ढकयथा॥कपेर्भा
वः कापेयम्॥ज्ञातेर्भावः ज्ञातेयम्॥कपिज्ञात्यार्ढ

कृ॥ण्यकृयथा॥बृहस्पतेर्भवः बार्हस्पत्यम्॥से
नापतेर्भवः सैनापत्यम्॥प्रजापतेर्भवः प्राजापत्य
म्॥पारोहियम्॥पत्यन्तपुरोहितादिभ्योयक्॥ञ्ये
त्रयथा॥॥अश्वस्यभावः आश्व्यम्॥उष्ट्रस्यभावः
औष्ट्रम्॥कुमारस्यभावः कौमारम्॥प्राणभृ
ज्जातिवयोवचनोद्गात्रादिभ्योऽञ्॥॥अणयथा॥

त्रिहायनस्यभावःत्रैहायनम्॥द्विहायनस्यभा
वःद्वैहायनम्॥चातुर्हायनम्॥यूनोभावोयौवन
म्॥स्थविरस्यभावःस्थाविरम्॥हायनान्तयुवादि
भ्योऽण्॥पृथोर्भावःपार्थिवम्॥माद्दवम्॥गोरवम्॥
इमइन्ताच्चलघ्वादेश्च॥चुञ्चुयथा॥रमणीयस्य
भावोरामणीयकम्॥वसनीयस्यभावोवसनीयकम्॥

न

आचार्य्यस्यभावआचार्य्यकम्॥योपधाद्गुरू
पोत्तमाद्वुञ्॥स्त्रीइतिप्रयोगविवेकेद्वितीयप
टलः॥ ॥श्रीमार्त्तण्डभैरवायनमः॥

परस्मैपदिनां उभयपदि आत्मनेपदिनां॥

तिप्॥तस्॥अन्ति॥प्रथमपुरुष॥ते॥आते॥अन्ते॥१॥
सिप्॥थस्॥थ॥मध्यमपुरुष॥से॥आथे॥ध्वे॥२॥
मिप्॥वस्॥मस्॥उत्तमपुरुष॥ए॥वहे॥महे॥३॥

॥१॥ए ओ संज्ञा लट्॥८॥

यात् ॥ यातां ॥ युस् ॥ प्रथम पुरुष ॥ ईत ॥ ईयातां ॥ ईरन् ॥
यास् ॥ तां ॥ यात ॥ मध्यम पुरुष ॥ ईथास् ॥ ईयाथां ॥ ईध्वं
यां ॥ याव ॥ याम ॥ उत्तम पुरुष ॥ ईय ॥ ईवहि ॥ ईमहि ॥

एषां झ्लालिङ् १७

तप् ॥ तां ॥ झ ॥ प्र० पुरुष ॥ त ॥ आतां ॥ अतां ॥ अंती ॥
थास् ॥ तं ॥ त ॥ मध्यम पुरुष ॥ स्व ॥ आथां ॥ ध्वं ॥
आमिप् ॥ आव ॥ आम ॥ उत्तम पु० ॥ इ ॥ आवहि ॥ आमहि ॥

एषां संज्ञा लोट् १८ ॥ आत्मनिपदि ॥
परस्मैपदि ॥ एषां संज्ञा लोट् १८ ॥ आत्मनिपदि ॥
उभौ १८ उभयपदि ज्ञेयं

ईंनमः ॥ तद्धित समयोग समिधायतिङ्समयोग समिधा
स्यामः ॥ तिङ् कृत समः ॥ तिङ्ं च नव पञ्चाङ्गो देशावप
रौद्विधा ॥ परस्मैपद मात्मनेपद मा
ख्यातं तङ्ं नवात्मनेपद म
१३ ॥ तिप् ॥ तस् ॥ झि ॥ सिप् ॥ थस् ॥ थ ॥ मिप् ॥ वस् ॥
मस् ॥ तं ॥ आताम् ॥ झ ॥ थास् ॥ आथाम् ॥ ध्वम् ॥ इट्
॥ वहि ॥ महि ॥ २८ ॥ इत्यष्टादशधातिङ् ज्ञेयः ॥ त
त्र तिङ्मुद्देशो धा संज्ञा ॥ तत्र प्रत्ययसंज्ञा ॥ विभक्तिसं

MEMORIAL
D. BHAU DAJI

ज्ञा॥परस्मैपदसंज्ञा॥आत्मनेपदसंज्ञा॥प्रथमपुरु
षसंज्ञा॥मध्यमपुरुषसंज्ञौ॥उत्तमपुरुषसंज्ञौ॥एकव
चनसंज्ञा॥द्विवचनसंज्ञा॥बहुवचनसंज्ञौ॥तत्रैकप्र
त्ययसंज्ञेत्यपेक्षायांसर्वेषांविभक्तिसंज्ञाच॥तिङांनव
पूर्वाणिवचनानिपरस्मैपदसंज्ञानिस्युः॥योद्वाव
पशेशतक्रमसचइत्येकादशधापरस्मैपदमुक्तम्॥
तङ्चानचच॥तङित्यनेननितङामुत्तराणिनवव

चनानिगृह्यन्ते॥आनञितिशानचकानचोरुस्मृष्ट
नुबन्धयोर्ग्रहणम्॥एकमात्मनेपदमेकादशधा॥पर
स्मैचात्मनेभागेवचनानित्रिधात्रिधा॥त्रयस्तिपुरु
षाज्ञेयाःप्रथमोत्तममध्यमाः॥१७॥उभयपदेपिप्र
थममध्योत्तमपुरुषावेदितव्याः॥परस्मैपदभागेय
था॥तिप्॥तस्॥झि॥सिप्॥थस्॥
थ॥इतिमध्यमः॥मिप्॥वस्॥मस्॥इत्युत्तमः॥एव

अंति

मात्मनेपदेष्वपि॥एकद्विबहुसंज्ञानिपदान्येकैकशस्तिङ्॥ज्ञेयंपरस्मैकर्त्रभिन्नभावेनापिकर्मणि॥१५॥
यानिकानितिङ्पदानिभवन्ति॥तान्येकैकंशएवकवचनद्विवचनबहुवचनसंज्ञानिभवन्ति॥परस्मैपदंकर्त्रर्थेवप्रयोक्तव्यंनभावकर्मणोः॥ननुयदिपरस्मैपदंकर्त्रर्थेवप्रयोक्तव्यंतर्हिकथंलोकेपच्यतिक्रियतिपुरुषकारेणनुवर्त्तयति॥तामाप्नोतिपच्यतिक्रिय

ति॥एतेह्येशब्दरूपेपरस्मैपदसंज्ञेनभवतः॥अपितुतङ्व्यत्ययेनतिङ्पदमितिशास्त्रकारवचनप्रमाणादात्मनेपदस्थानेपरस्मैपदंकर्त्तव्यम्॥तस्मात्परस्मैपदश्रवणेपिआत्मनेपदंज्ञातव्यम्॥आत्मनेतुत्रिषुज्ञेयंभावेकर्मणिकर्त्तरि॥धातोरकर्मकाद्भावेप्रथमैकवचस्थ॥१६॥आत्मनेपदंभावेकर्मणिकर्त्तरिचभवति॥
इत्युक्तेकिम्॥तर्हिसर्वेभ्योधातुभ्योनापिसर्वेप्रथम

ध्यमोत्तमपुरुषाः भवन्ति॥ नापि सर्वाणि वचनानि॥
किन्तर्हि भावे अकर्मकादेवधातोरात्मनेपदं भवति
प्रथमपुरुषैकवचनमेव भवति॥ यथास्थीयते॥ न
तुस्थीयन्तेनेतिकदाचिद्रूपम्॥ सकर्मकाकर्मका
द्धातोः कर्त्तरि स्मृतमात्मने॥ यत्तुकर्मणिनिर्दिष्टंक्रि
यतेतत्सकर्मकात्॥१७॥ यदाऽऽत्मनेपदंकर्त्तरि भव ४१
ति॥तदासर्वस्माद्धातोः भवति॥ सकर्मकादकर्मका

च्चेति॥ सकर्मकर्त्तीवत्॥ कटंकुरुतेदेवदत्तः॥ स्वरित
इत्यात्मनेपदम्॥ श्रोतेदेवदत्तः॥ अनुदातेत्यात्मनेप
दम्॥ यदितियत्पुनरात्मनेपदंकर्मणिनिर्दिष्टंतत्स
कर्मकादेवधातोर्नाकर्मकात्॥ यथाकटःक्रियते
राजपुरुषेण॥ भावकर्मणोरात्मनेपदे॥ प्रथमपुरु
षःकेनसहयुज्यतेनामैवति॥ यथाजयतिब्रह्म
णः॥ मध्यमपुरुषःकेनसहयुज्यते॥ युष्मदेति॥

उत्तमपुरुषःकेनसहप्रयुज्यते॥अस्मदेति॥नाम्नैव
सन्तियोक्तव्यःप्रथमःपुरुषोभवेत्॥त्वंयुवांयूयमित्ये
भिस्त्रिभिरेवतुमध्यमः॥१८॥त्वमिति॥यथात्वंजय
सि॥युवांजयथः॥यूयंजयथ॥उत्तमस्तुकेनसहप्रयु
ज्यतेअतआह॥अहमावांवयंत्वेभिरुत्तमानान्यथा
मतः॥अन्यथाचप्रहासेस्यात्त्वंमन्येऽहंचभोस्सखे ४२
॥१९॥इत्येवमुक्तंभवति॥उत्तमोनामपदंसहप्रयु

ज्यतेनयुष्मत्पदेनसहेति॥किन्तर्हिअस्मत्पदैरेव
॥यथाअहंजयामि॥आवांजयावः॥वयंजयामः॥किम
स्मत्पदैरेवोत्तमःपुरुषःप्रयुज्यतेनान्यथा॥अतआ
हअन्यथेति॥तथाहि॥प्रहासः॥परिहासः॥एहिमन्ये
भोस्सखेइतिप्रहासेप्रयोगःकर्त्तव्यः॥मन्येत्वंभोस्सखेअ
हमिति॥मध्यमपुरुषस्थानेउत्तमपुरुषःप्रयोज्यः॥
नान्यत्र॥उक्तंतिङ्रूपमात्रम्॥तिङ्प्रयोगस्तुक

स्मिन्हि स्तरेणप्रत्युच्यते॥अस्तिकश्चित्प्रयोगः॥य
स्यकर्म्मणिप्रथमा॥तस्यकर्त्रितृतीया॥यथावृक्षःछि
द्यतेतक्षकेन॥कदाचिद्द्वितीयास्तात्॥यथावृक्षंछिन
त्तितक्षकः॥कचित्षष्ठी॥वृक्षस्यरुजतिरोगः॥रुजा
र्थानांभाववचनानामज्वरेरितिषष्ठी॥राज्ञांपिन
ष्टिराजा॥ज्ञासिनीतिषष्ठी॥कदाचिच्चतुर्थी॥ग्रामाय ४३
व्रजतिपुरुषः॥जत्यर्थीतिचतुर्थीद्वितीयाच॥द्विक

र्म्मणिजन्तःप्रयोजोविज्ञेयः॥तस्मात्तिङ्प्रयोजेविष
येद्विकर्म्मणिजन्तः॥तस्मात्तत्प्रदर्शयिष्यामः॥णि
जन्तेभ्योधातुभ्यःकर्म्मविवक्षायांकर्म्मण्यभिधे
येद्विकर्म्मणीयमभिधीयते॥प्रधानमप्रधान
श्चेति॥तत्रकिम्॥तिङन्तेनपदेनप्रधानकर्म्माभि धीय
ते॥योभाष्यकारएवाह॥प्रधानकर्म्मण्याख्येयेण्यादी
नांतुद्विकर्म्मणाम्॥अप्रधानेदुदादीनांण्यन्तेकर्त्रुश्चक

र्म्मणः॥२०॥कोऽर्थः॥द्विकर्म्मकेषु धातुषु कर्म्म विवक्षायां
मुख्यं प्रधानकर्म्म निर्दीयते॥अपेक्षितत्वाच्च कर्म्मणः प्रथ
मैवमुक्तवान्॥तत्र किमुदाहरणम्॥नीयते देवदत्तेन ग्रा
मम्॥आकृष्यते गौर्गोपालेन व्रजम्॥दुहादीनां धा
तूनां प्रयोगे कर्म्म विवक्षायां मुख्यं प्रधानकर्म्म निर्दीयतेति
सूत्रेण॥केपुनर्दुहादयः॥दुहि याचि रुधि प्रच्छि मन्थि मुषि
क्षि आमुपयोगनिमित्तमपूर्वविधौ॥ब्रुविशास्त्रियुरोन

चयस्मचेतेतदकीर्त्तितमाचरितंकविना॥द्विकर्म्मकवच
नं॥दुह्यतेगौर्देवदत्तेनक्षीरम्॥याचिर्य्यथा॥याच्यतेस
जाब्राह्मणेनधनम्॥रुधिर्य्यथा॥रुध्यतेगौर्देवदत्तेन
व्रजम्॥प्रच्छिर्य्यथा॥पृच्छ्यतेभिक्षुर्देवदत्तेनग्रामम्॥भि
क्षिर्य्यथा॥भिक्ष्यतेगोपालकोमाणवकेनक्षीरादि॥चि
न्त्यथा॥चीयतेतरुर्देवदत्तेनफलानि॥उच्यतेयज्ञमाम
धर्म्मर्षिणा॥शिष्यतेशास्त्रंगुरुणाशिष्यः॥एयन्तेभ्यो

MEMORIAL

धातुस्थोयः कर्त्ताकर्म्मभूतःसएवाभिधीयते॥किमुदाह
रणम्॥गच्छतिभृत्योग्रामम्॥गमयतिभृत्यंग्रामंगुरुः॥
गम्यतेभृत्योराज्ञाग्रामम्॥बुध्यतेशास्त्रंशिष्यः॥बो
धयतिशास्त्रंशिष्यंगुरुः॥बोध्यतेशास्त्रंशिष्योगुरुणा
॥भुङ्क्तेब्राह्मणः॥भोजयतिब्राह्मणंदेवदत्तः॥भोज्यतेब्रा
ह्मणश्चोदनंदेवदत्तेन॥पठतिमाणवकःशास्त्रं॥पाठय
तिमाणवकंशास्त्रमुपाध्यायः॥पाठ्यतेमाणवकःशास्त्र

मुपाध्यायेन॥आस्तेआसनेऽतिथिः॥आसयत्यतिथि
मासनेनागरः॥आस्यतेऽतिथिरासनेनागरेण॥क
र्त्तुःकर्म्मसंज्ञायांनीवह्योःप्रतिषेधोवक्तव्यः॥गतिबुधा
त्यादिनानीवह्योःअन्यन्तयोर्य्यःकर्त्तासःणावपिसति
कर्म्मसंज्ञोभवति॥यथादेवदत्तोनयतिग्रामम्॥नाययय
तिग्रामंदेवदत्तेनयज्ञदत्तः॥कर्त्तर्य्यनभिहितेकर्म्मणि
प्रढरभिहिते॥वाक्यतेजोग्रामंदेवदत्तेन॥वदतिभारंदे

वदत्तोग्रामम्॥वाह्येतेदेवदत्तेनभारोग्रामम्॥सर्वत्रप्रत्य
वसानार्थेभ्यआदेर्ण्यन्तस्यप्रतिषेधोवाच्यः॥यत्किञ्चित्का
र्य्यंप्रत्यवसानार्थेनिर्दिष्टम्॥आदेर्द्वीतोरेकस्यसर्व
स्मिन्निधौकर्म्मसंज्ञामाभूत्॥ण्यन्तस्यादेर्न्तिगरण
चलनार्थेभ्यश्चेत्यनेनसत्रेणपरस्योपदंप्राप्तंतन्मा
भूत्॥गतिबुद्धीत्यादिनायःकर्त्तास्यैवस्तस्यकर्म्मसं
ज्ञामाभूत्॥अथाग्नितिपायंदेवदत्तः॥आदय

वं

ंतिंप्रत्ययोतेपायसंदेवदत्तेनयज्ञदत्तः॥तस्यकर्म्मसंज्ञा
प्रतिषेधइतियदिवक्तव्योनास्ति॥एवंप्रतिषेधोभविष्य
ति॥आदयतिपायसंदेवदत्तंयज्ञदत्तः॥जग्धंतस्येति
॥इदमेषांस्यं॥क्रोधिकरणेचध्रौव्यगतिप्रत्यवसा
नार्थेभ्यःइतिक्रः॥अहोजग्धिर्ब्रह्मबन्धुकिलतिजग्धिरादे
शः॥अत्रषष्ठीप्रतिषेधोमाभूत्॥कवतिपर्य्युदासोन
स्यात्॥अधिकरणेवाचिनश्चेतिकृत्रत्ययस्यप्रयोगे
षष्ठीस्यात्तौ॥किञ्चस्यात्॥नकेरहिंसायां॥नकेर्द्वीरहिं

सायामर्थे कर्तुकर्म्मसंज्ञाप्रतिषेधः॥न क्रयतिपिण्डंदेव
दत्तः॥अयंगिऊन्नश्चुशद्दिलकृणः॥पुनर्हेतुमतिणि॥
ज्यिधीयतेहेतुमतिलकृणेविधीयमानेएवंप्रयोग
ः॥न क्रयतिपिण्डंदेवदत्तेनयज्ञदत्तः॥अहिंसायांकिं
॥न क्रयतिवत्सीवद्दीनवायसान्नयज्ञदत्तः॥कर्म्मसं
संज्ञाप्रतिषेधः॥वहेरनियन्नकर्ईकस्या॥वहेर्धातो
रनियन्नकर्ईकस्याण्यन्तस्ययःकर्त्तातस्याण्यन्तस्य ४७
कर्म्मसंज्ञानिषेधोवाच्यः॥वहतिबलीवर्द्दोभारं॥वा

हैतिबलीवर्द्देनभारंयज्ञदत्तः॥अनियन्नकस्येतिकिं
॥वहतिबलीवर्द्दोभारम्॥वाद्यतिबलीवर्द्दान्भारं
पथिकः॥वलीवर्द्देषुभारोनीयमानइत्यर्थः॥उक्तो
यंतिङ्प्रयोगः॥एवंसर्वेषुप्रयोगेषुभवति॥संक्षेपा
त्तिङ्प्रयोगमभिधायकृत्प्रयोगमवसरप्राप्तंव
क्ष्यामः॥कष्टेनलिखितंग्रंथंयत्नेनप्रतिपालयेत्॥

अद्यापि श्रुयतां घोषो दारकायां पुनर्नवः ॥ अविधो
वासुविधोवा ब्राह्मणो मामकीं तनुं ॥१॥

सकलात्मने नमः ॥ श्री अथ कृत्प्रयोगाः लिख्यं
ति ॥ कृतस्त्रिषपि वर्त्तंते भावे कर्तरि कर्म्मणि ॥ च्यञ
पल्युट क्तिन् च भावे युजकारड॰ राएव च ॥ य
थातिङ॰ प्रत्यया भावे कर्म्म कर्त्तृषु भवंति तथा कृत्प्रत्ययाश्च
पि ॥ भवंतु च्च च्च पल्युट क्तिन् च ञ्युच च्च कारञ्च
ड॰ ञ्च ॥ इत्येते प्रत्ययाः भावे भवंति न कर्म्मणि नापि कर्त्त

रि॥अचूयथा॥पुष्पाणांचयः॥जयः॥क्रयःज्वरः॥प
रः॥धरः॥क्षेपनेक्षिपः॥इत्याद्यजन्तकल्पम्॥अचप्रत्य
यान्तंपुंसिनान्यत्र॥एरजिसच॥अपूयथा॥शराणां
निकरः॥दरः॥षरः॥शरः॥सरः॥भवः॥जवः॥उपद्र
वः॥उपप्लवः॥प्रणवः॥ऋदोरप्॥निग्रहः॥ग्रहवृद्ध
निश्चिगमश्चत्यप्रत्ययान्ताःसर्वेएतेपुंसि॥ल्युट

यथा॥ओदनस्यपचनांशरणम्॥आसनम्॥वाह
नम्॥यानम्॥शासनम्॥गानम्॥ल्युङ्क्षितल्युट्॥
पचनम्॥म्रियतेअनेनेतिभरनम्॥श्रूणात्यस्मिन्नि
तिश्रवणम्॥करणम्॥वरणम्॥अधिकरणम्॥क
रणाधिकरणयोश्चेतिल्युट्॥ल्युडन्तंनपुंसकम्॥
क्तिन्नूयथा॥पुण्यस्यकृतिः॥कर्तृकर्मणोःकृतीषष्ठी॥
गतिः॥मतिः॥स्मृतिः॥बुद्धिः॥भित्तिः॥उदितिः॥ऋ

हिः॥पुष्टिः॥तुष्टिः॥प्राप्तिः॥स्त्रियांक्तिच्॥पापच्चो
भावेद्युमास्येतीत्वम्॥घञ्यथा॥ओदनस्यपाकः
॥यागः॥त्यागः॥वादः॥भावः॥वेदः॥भावेचेतिघञ्
॥युच्यथा॥कारणा॥चेतना॥छेदना॥यातना॥
शोषना॥एवमादिण्यासंश्रयोयुच्॥अकारप्रत्यया
यथा॥चिकीर्षा॥जिगमिषा॥चिकित्सा॥जिघत्सा॥बु
भुत्सा
बुद्धा॥तितिक्षा॥जिज्ञासा॥अप्रत्ययादित्यकारप्रत्ययः॥

इच्छा॥गुरोश्चहलइत्यप्रत्ययः॥अङ्यथा॥उपधा॥
अभिख्या॥आतश्चोपसर्गेइत्यङ्॥भिक्षणंभिक्षा॥
रक्षा॥भिदा॥जरा॥तृष्णा॥षिद्भिदादिभ्योऽङित्यङ्
॥अदृशोऽङिगुणः॥शोयथा॥क्रियाकृञेः॥श
चेतिराः॥इत्युक्ताःकेवलभाववाचिनः॥अथभि
वाचकाःप्रत्ययाउच्यन्ते॥सकर्मकाकर्मकाद्धातोः
भवेत्कर्मभावयोः॥कृत्याश्चेवखल्वर्थाश्चतयोरवा

MEMORIAL

वर्णिताः॥यदा क्त प्रत्ययः कर्मणि भवति तदा सकर्मक
कादेव धातोः॥यदा पुनः क्तो भावे भवेत्तदा सकर्मक
कर्मकाधातोः॥यदा सकर्मकेभ्यो धातुभ्यः क्तो वि
धीयते॥तदा कर्मण्येव वर्त्तते॥यदा अकर्मकेभ्यो
धातुभ्यो भवति तदा भावे वर्त्तते न कर्त्तरीत्यर्थः॥य
दा भावे वर्त्तते तदा सकर्मकविभक्तिरूपादीयते॥
षष्ठी चोपायते॥यथा देवदत्तस्य भूतमिति॥न पु

५१

५१

सकेभावे क्तः॥सकर्मकोयथा॥देवदत्तस्य गतमिति
॥क्तस्य च वर्त्तमाने अनुदात्तोपदेशेइत्यादिना अनु
नासिकलोपः॥तृतीया कदाचिदिष्यते॥यथा देव द
त्तेन भुक्तमिति॥कर्तृकरणयोस्तृतीया॥यदा पुनः
कर्मणि क्तो वर्त्तते तदा तस्य कर्मणि प्रथमा॥तस्य
कर्त्तरि तृतीयैव॥नान्या विभक्तिरुपादीयते॥यथा
देवदत्तेन नावतीर्णसमुद्रः॥रदाभ्यां निष्ठातो नः पू

वस्य दइति निष्ठातस्य नः ॥ अथ कृत्यानाह ॥ कृत्या
श्चेति ॥ तयोरेव भावकर्मणोः कृत्याः खलर्थाश्च भ
वन्ति ॥ किपुनः कृत्यप्रत्ययाः ॥ तव्यत्तव्यानीयरोय
त्कयपण्यत्खलर्थेवच ॥ युजिभिः प्रत्ययैराष्टौ
कृत्यसंज्ञाः प्रकीर्त्तिताः ॥ तव्यस्तावत् ॥ भोक्तव्यो
दनो देवदत्तेनदेवदत्तस्य च ॥ कृत्यानांकर्त्तरि वे

ति ॥ यदीषष्टीतदानतृतीयैव ॥ यथा कर्त्तव्यः कर्त्तव्यः ॥
उपास्तितव्यः ॥ सवितव्यः ॥ भवितव्यम् ॥ हसितव्यम्
॥ गन्तव्यम् ॥ श्रोतव्यम् ॥ रोचयितव्यम् ॥ इत्यादि ॥ यथा
तव्यद्रूपंतथातव्यस्यापि ॥ केवलं प्रत्ययभेदः ॥
अनीयन्यथा ॥ देवदत्तेनहरणीयोधर्मः ॥ स्पृह
णीयं रूपम् ॥ तव्यत्तव्यानीयरः सूत्रम् ॥ कृत्याप्राङ्
एवुल इति कृत्यसंज्ञा ॥ यत्यथा ॥ पेयमु[illegible]
दकम् ॥

देवदत्तेन प्राप्यम्॥नेयम्॥ज्ञेयम्॥अचोयदितियत्॥इतियतीतीकारः॥क्यपि यथा॥स्तुत्यो देवदत्तः॥शिष्यो बालः॥यतिस्तुशास्वृदृजुषः क्यप्॥कृत्यः॥विभाषा कृवृषोः॥भृत्यः॥भृञः संज्ञायाम्॥ण्यत्यथा॥कार्य्यो धर्म्मः॥भेद्यम्॥भोज्यम्॥भोग्यमिति॥ऋहलोर्ण्यत्॥ईषत्करः॥दुःकरः॥सुकरः॥सुलभः॥दुस्तरः॥सुतरः॥सुगमः॥ईषद्बाधः॥

दुर्बोधः॥ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्॥कर्तरि कर्म्मणोरिति प्राप्ते॥न लोकाव्ययेति षष्ठीनिषेधः॥युचयथा॥कृच्छ्रेण दीयतेऽस्मिन्निति दुर्दानम्॥सुदानम्॥सुपानम्॥आतोयुचितियुच॥क्तिः प्रत्ययः॥किं कर्म्मण्येव वर्त्तते आहोस्विदन्यत्र॥त्रिषु गत्यर्थकादिष्यस्तथा चैवादिकर्म्मणि॥अकर्मकात्समुत्सृज्य

वर्त्तते भावकर्म्मणोः॥कृञ्योगे गत्यर्थादिभ्यो धातुभ्यो वर्त्तते॥यूरुचादिकर्म्मणि च त्रिष्वपि भावकर्म्मकर्तृष्वपि वर्त्तते॥कः पुनर्गत्यर्थाः॥गत्यर्थाकर्म्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेत्यत्र गत्यर्थादयः॥तेभ्य एव कर्त्तरि वर्त्तते॥त्रिषु साधनेषु पि भवति भावे यथा कर्म्मणि तावत्॥गतो देवदत्तेन ग्रामः॥कर्त्तरि

पुनः॥देवदत्तो ग्रामं गतः॥भावे पुनः॥देवदत्तेन गतम्॥धातवस्तु पुनरकर्म्मका अपि सोपसर्गाः सकर्म्मका भवन्ति॥सकर्म्मको धातुः कर्म्मणि यथा॥अनुशुष्कः सूर्य्येन द्रवः॥शाषः कइति कः॥श्लिषि र्यथा॥आश्लिष्टो कन्यानेन॥कन्यामाश्लिष्टोऽयम्॥कर्त्तरि यथा॥गुरुमधिशयितोऽयम्॥भावे कि

त्वम्॥अकारस्यकर्त्तरित्तु॥उपस्थितोगुरुम्॥उपस्थि
तंशिष्येन॥वसयथा॥अध्युषितोगुरुरनेन॥वस
तिक्षुधोरितीट्॥अध्युषितोऽयंगुरुम्॥अध्युषि
तमनेन॥वचिस्वपियजादीनांकिति॥जनिर्यथा
॥उपजनितःपुत्रम्॥उपजनितःपुत्रः॥उपजनि
तमनेन॥रुहिर्यथा॥आरूढोवानरोवृक्षम्॥

आरूढंवानरेण॥होढःइतिढत्वम्॥भूषस्तथोर्द्धो
यइतिधत्वम्॥ष्टुत्वढलोपौ॥ढलोपेदीर्घः॥जूष
यथा॥अपजीर्णोदेवदत्तश्चैत्रेण॥चैत्रमपजीर्णो
मैत्रः॥जीर्णंतेन॥ऋतइद्धातोः॥वोरुपधायाइति
दीर्घइकः॥रदाभ्यामितिनस्यनः॥आदिकर्म्मणि
कः॥कर्म्मकर्त्तरिभावेषुवर्त्तते॥यथाभुक्तओदन

मयम्॥सुक्लोदनेन॥अकर्मकादिति॥य
दाक्तः अकर्मकेभ्यावर्त्तते॥तदाकर्त्तरिभावयार्व
र्त्तते॥कर्त्तरियथा॥शरदिशुद्धानदी॥शुद्धनद्या
॥इक्षुचक्रवतुविचतन्क्विपक्मरच्षाकर्त्तरिच
णिन्यचः॥उकारोणुकञटकृटकादादाकर्त्तरिच
स्मृता॥इक्षुजादयःप्रत्ययाःकर्त्तरिवर्त्तन्ते॥कथम्॥

इक्षुचतावत्॥पुत्रमलंकरिक्षुः॥अलंकृञ॥
निराकृञइत्यादिनाइक्षुच॥कृवतयथा॥दे
मंगतवान्देवदत्तः॥क्तक्तवतुनिष्ठाक्तवतुप्रत्ययः
॥नलोकाव्ययनिष्ठाखलर्थप्रतिषेधः॥विचयथा॥दे
वदत्तस्यउपयुङ्क्तइत्युपयुग्देवदत्तः॥विजुपेक्षेद
सीतिविचेर्तनयथा॥कटंकरोतीतिकटंकर्त्तादे

वदत्तः॥नलोकाव्ययेतिषष्ठीप्रतिषेधः॥तन्निति
तनञ्चाक्तस्ताछील्यतद्धर्मतत्साधुष्वितितन्॥
क्विप्यथा॥काष्ठस्यभिद्वदत्तः॥सत्सूद्विषति
क्विप्॥कारच्चयथा॥ओदनेस्यपच्चस्मरोदेवदत्तः
॥सत्यस्यदःकारच्च॥षाकन्नयथा॥ओदनस्यभि
क्षाकः॥जल्पभिक्षकुट्टलुटकुञःषाकन्॥ल्यु

यथा॥पुत्रस्यनन्दनोदेवदत्तः॥णिनिर्य्यथा॥राष्ट्र
स्यग्राहीदेवदत्तः॥आचयथा॥ओदनस्यपचः॥न
न्दिग्रहिपचादिभ्योल्युणिन्यचेतिगणत्रयेभ्यः त्र
यःप्रत्ययाःभवन्ति॥उकोरायथा॥कटंचिकीर्षुः
॥सनाशंसभिक्षउः॥अतोलोपः॥अणयथा॥कु
म्भकारः॥कर्म्मण्यण्॥उकञयथा॥यागंकामुकः॥

बलपतपदेषु कञ्॥टकयथा॥सिधुपिवतीति
सीधुपः॥सामंगायतीति सामगः॥गापोष्टक्॥
टयथा॥गिरिचरः॥चरेष्टः॥कयथा॥पुत्रस्यप्रि ५८
योदेवदत्तः॥अभिज्ञः॥पर्णस्यक्षिपोवपुषःइगुप
धज्ञाप्रीकिरःकः॥भावेचोत्तरकालेचल्युटुतु
मुल्कापूर्वकालजाः॥कर्मणिप्रथमातेषांद्वि

तीयातुविशेषतः॥ल्युटुतुमुल्कएतेत्रयःप्रत्ययाः
पूर्वकालिकाएवपरन्तुभाववर्त्तिनकर्मकत्रयाः
॥तेषांकर्मणिविधीयते॥ल्युटावत्॥कटकःप्रे
क्षणीयोदेवदत्तेन॥समानकर्तृकयोःपूर्वकाले
क्त्वा॥समासेऽनञ्पूर्वे क्त्वोल्यप्॥हस्वस्यपिति
कृतीतितुक्॥तुमुन्ण्वुलौक्रियायांक्रियार्थायां

व्यपि भावसंज्ञा॥ अव्ययादाप्सुपइति सुपोलु
क्॥ तुमुन्यथा॥ ग्रामोगन्तुमिष्यते देवदत्तेन॥
तुमुन्एवलोक्रियायांक्रियार्थायांतुमुन्॥ तुको
प्रत्ययोयथा॥ कटंकर्त्तुमिष्यतेइज्ञा॥ वर्त्तमानेतृ
निर्द्दिश्यवर्त्तितेरातरानचौ॥ द्रव्यसत्वापरत्वा
भ्यांसमासेनतुसिध्यति॥ रातरानचौकर्त्रि

न्कालेवर्त्तते॥ वर्त्तमानकालेकर्त्तारंकेरात
रानौप्रत्ययौभवतः॥ रानचप्रत्ययस्तुत्रिष्वपि
वर्त्तते॥ केतरिकर्म्मणिभावेच॥ वर्त्तमानेतुनि
र्द्दिश्यवर्त्तितेरातरानचाविति॥ रातताव॥ कटं
कुर्वन्देवदत्तः॥ ओदनंपचति॥ रानचयथा॥
रांकंपचमानोदेवदत्तस्तुष्यति॥ कर्म्मणिय

था॥पच्यमानओदनोदेवदत्तेन॥नरोभते
तिलकःक्रियमानोदेवदत्तेन॥लक्षणहेत्वो:
॥क्रियायाः इतिशतृशानचौ॥लटःस्थानेकि
मूशतृशानचधातुभ्योसिध्यतीत्यतआह॥
द्रव्यसत्त्वापरत्वाभ्यामिति॥कोऽर्थः॥उत्तरपद
स्थितेनकर्तृप्रत्ययेनसमासोनभवति॥कथ

मवगम्यतेकटंकुर्वन्॥ओदनंपचमानः॥ग्र
न्थनाशभयादुक्ताश्लोकानांपञ्चविंशतिः॥
परार्थभावंनिचेष्टंप्रभवंयंभवेभवे॥प्र
योगलाभचातुर्यंयशोभिलाषिणांकारुण्य
विभासितंचेतसांप्रवृत्तिरितितत्रदर्शनेनार्थ
मित्यर्थः॥ ॥इतिप्रयोगविवेकवरुचिकृतेत

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तीयःपटलःसमाप्तः॥शुभमस्तु॥सिद्धिरस्तु॥
शिवपार्वती॥शके१८८० प्रमाथीनामसंव
त्सरेउदगयनेवसंतौवैशाखशुद्ध१एकु
वासरेगंगाधरदैवज्ञतत्सुतनारायणदैव
ज्ञचक्रापुरिस्थितेतेनपरोपकारार्थेलिखितंशु
पाठकस्तुशुभंभवतु॥श्रीमार्त्तंडभैरवायनमः॥ १३